# M.A. 1st Semester Examination, 2019

## SANSKRIT

## PAPER—SAN-102

*Full Marks* : 40

*Time* : 2 hours

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

प्रश्नानां सर्वेषामुत्तरं संस्कृतेनैव प्रदेयम्

1. यथेच्छं प्रश्नचतुष्टयं समाधेयम् — 2 × 4

(क) शतपथब्राह्मणस्य कति शाखा: ? काश्च ता: ?

(ख) किं तावत् वाकोवाक्यम् ? का खलु नाराशंसी ?

(ग) अजीगर्तस्य कति पुत्रा: ? तेषां नामानि लिख्यन्ताम् ।

( *Turn Over* )

(घ) हरिश्चन्द्रस्य राजसूये यज्ञे उपस्थितानामृषीणां परिचयो दीयताम्।

(ङ) केनोपनिषद् कुत्र समुपलभ्यते ?

(च) "केनेषितं प्रेषितं मनः" — इत्यत्र 'केनषितम्' इत्यस्य कोऽर्थः ?

(छ) तत कस्मै मां दास्यतीति — इति कस्यां उपनिषदि वर्तते ? कस्योक्तिरियम् ?

(ज) यस्मिन् गृहे अतिथिः अनश्नन् निवसति तस्य गृहस्वामिनः किं भवति ?

**2.** यथेच्छं चतुष्टयं व्याख्येयम् — 4 × 4

(क) अहरहर्भूतेभ्यो बलिं हरेतु । तथैतं भूतयज्ञं समाप्नोति ।

*अथवा*

अहरहः स्वधा कुयोद्वोदपात्रात् तथैतं पितृयज्ञं समाप्नोति ।

(ख) आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ।
होते निपद्यमानस्य चराति चरतो भगश्चरैवेति ।।

*अथवा*

चरणवै मधु विन्दति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति ।।

(ग) श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः ।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ।।

*अथवा*

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम् ।।

(घ) येयं प्रेते विचिकित्सामनुष्येऽस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टत्वयाऽहं वराणामेष वरस्तृतीयः ।।

*अथवा*

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव ।।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ।।

3. यथानिर्देशं समाधेयम् — 8 × 2

(क) उपनिषत्पदार्थं निरूप्य केनोपनिषदः परिचयः प्रदीयताम् ।

*अथवा*

कठोपनिषदि वर्णितं नचिकेतसः प्रथमवरस्वरूपं विशदीक्रियताम् ।

(ख) पञ्चानां महायज्ञानां नामान्युल्लिख्य ब्रह्मयज्ञस्य स्वरूपं फलञ्च संक्षेपेण शतपथोक्तदिशा विव्रियताम् ।

*अथवा*

शुन:शेपोपाख्यानस्य सामाजिकदृष्ट्या किं तात्पर्यं तत् प्रस्तूयताम् ।